International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 311-313
© 2026 IJMH
www.themultijournal.com

Received: 28-03-2026
Accepted: 22-04-2026
Publish : 23-04-2026

**नलिनाक्ष पण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, 517507.

**Correspondence:**
**नलिनाक्ष पण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, 517507.

# आचार्यसम्पदानन्दमिश्रमहोदयस्य कृतिषु रामायणस्य प्रभावः

**नलिनाक्ष पण्डा**

**DOI:** https://doi.org/10.5281/zenodo.20679561

**✯ निबन्धसारः –**

वाल्मीकिरामायणं संस्कृतसाहित्यस्य आदिकाव्यं वर्तते। यत्र छन्दसां प्रभावः अतीव गभीरः मधुरश्चास्ति। बहव कवयः छन्दशास्त्रमाधारिकृत्य बहुनि पुस्तकानि विरचितवन्तः। आचार्यसम्पदानन्दमिश्रमहोदयोऽपि छन्दशास्त्रमूलकं पुस्तकं **"छन्दोवल्लरी"** (A hand book of Sanskrit prosody.) इति विरचितवान्। अनेन महोदयेन स्वकीय **"छन्दोवल्लरी"** ग्रन्थे रामायणे प्रजुज्यमानानां छन्दसां आलोचनं कृतम्। प्रायशः रामायणे प्रयुक्ताना षोडशछन्दसां सोदाहरणेन बहुना श्लोकानां च प्रतिपादनं कृतम्।

**✯ कुञ्चिकाशब्दाः –**

- रामायणम्
- छन्दः
- प्रयोगः

**✯ भूमिका –**

- **संस्कृतसाहित्यम्**

साहित्यशब्दोऽयं साधारणतः काव्यकवितासमुदायं बोधयति। यथा संस्कृते – रघुवंश – कुमारसम्भव – मेघदूतमभृतीनि काव्यानि प्रसिद्धानि। अत एव विभिन्नाः कवयः आलङ्कारिकाश्च स्वीयकाव्यकवितासु साहित्यशब्दस्य प्रयोगं कृतवन्तः।

यथा भर्तृहरिणोक्तम् –

**साहित्यसंगीतकलाविहीनः**
**साक्षात्पशुः पृच्छविषाणहीनः ।**
**तृणं न खादन्नपि जीवमान-**
**स्तद्भागधेयं परमं पशूनाम् ॥ इति।।** [1]

एवमेव काव्यमीमांसाकारेणापि उक्तम् –

***"पञ्चमी साहित्यविद्येति यायावरीयः, सा हि चतसृणां विद्यानां निस्यन्दः"*** इति।

नैषधकारः श्रीहर्षः अपि काव्यार्थे साहित्यशब्दस्य प्रयोगं कृतवान्। यथा –

**साहित्ये सुकुमारवस्तुनि दृढं न्याये ग्रहग्रन्थिले।**
**तर्के वा मयि सम्विधातरि समं लीलायते भारती।।इति।।** [2]

एतादृशस्थले साहित्यशब्दः सङ्कुचितार्थे प्रयुक्तः। परन्तु साहित्यं सङ्कुचितार्थे नैव ग्रहणीयम्। वास्तवतः शब्दार्थयोः सहितयोर्भावः साहित्यम्। साहित्यशब्दस्य व्यापकार्थः भवति वाङ्मयम्। अतिप्राचीनमिदं संस्कृतवाङ्मयम्। अतिव्यापकश्च इदं वाङ्मयम्। इदं सर्वाङ्गपूर्णं यतोऽत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्थाः विवेचिताः। धर्मशास्त्रं प्रथमम् एव, अर्थशास्त्रमपि कौटिल्यादिप्रणीतमत्र। काव्यशास्त्रमपि परमप्रसिद्धमत्रत्यम्, मोक्षशास्त्रस्यापि परमप्रकृष्टता सर्वसम्मता इति कथनं समुचितमेव। अत्र प्रेयः शास्त्रं, श्रेयः शास्त्रं चोभयं समभावेन समेधितम्, अत एव चात्र भोगमोक्षयोरुभयो सत्यतां सकलसाहित्यापेक्षया संस्कृतसाहित्यस्य विशिष्टतां प्रतिपादयति।

**✯ आचार्यः सम्पदानन्दमिश्रः**

लौकिकसंस्कृतसाहित्ये महर्षिवाल्मीकिः आदिकविरूपेण परिगण्यते, तथा तद् विरचितं रामायणं च आदिकाव्यमिति प्रशंस्यते। ततः निरवच्छिन्नधारया सरस्वतीकृपाकटाक्षेक्षिताः कवयः विविधानि काव्यानि संस्कृतभाषया विरचितवन्तः तानि विरचनानि अधुनापि अस्माकं मानसपटले राराजन्ते। एवं रूपेण भूयान्कालः व्यपगतः। क्रमशः भारतं वैदिकशासनाधीनं जातम्। तस्मिन् काले धूमावृताग्निरिव मेघावृतचन्द्रः इव वा स्वप्रतिभा या कविसमाजे लुक्कायितरूपेण आसीत्, प्रतिबन्धकापगमानन्तरं सा सहृदयजनसमाजे अमराकृतिरूपेण प्रतिभाति। प्राचीनकाले कविपरम्परा अतिचमत्कारिणी आसीत्। यमक श्लेषानुप्रासादीनां योजनेन अतिशयोक्तिराजितेन काव्येन कवयः स्वपाण्डित्यं प्रदर्शयन्ति स्म। क्रमशः जनानां मेधाशक्तिः वोधशक्तिश्च क्षीणा जाता। संस्कृतस्य परम्परा अपि विच्छिन्ना समभवत्। आङ्गलशासनकाले भारते संपूर्णरूपेण संस्कृतशिक्षा ध्वस्ता जाता। भारतस्य स्वाधीनतानन्तरं केचन महाप्राणाः विद्वांसः सुरभारतीभाण्डागारं पूरयितुकामाः संस्कृतकाव्यादिकं रचयितुं प्रवृताः जाताः।

एतादृशेषु अर्वाचीनसंस्कृतकविषु अनेके विद्वत्तल्लजाः अस्माकं पुरतः प्रतिभान्ति। तेषु उत्कलप्रदेशे लब्धजन्मा आचार्यसम्पदानन्दमिश्रमहोदयः अन्यतमः। आचार्यसम्पदानन्दमिश्रमहोदयः बहवः ग्रन्थाः विरचितवान्। तेषु ग्रन्थेषु **"छन्दोवल्लरी"** (A hand book of Sanskrit prosody) इति ग्रन्थः अन्यतमः वर्त्तते। वस्तुतः ग्रन्थेऽस्मिन् मिश्रमहोदयेन छन्दसां विवेचनं कृतम्। तत्र वाल्मीकिविरचिते रामायणे केषां छन्दसां प्रयोगः अभवत् इति सविस्तीर्णतया प्रतिपादितम्।

**• छन्दशास्त्रस्य संक्षिप्तपरिचयः –**

छन्दशास्त्रस्य प्रणेता पिङ्गलाचार्यः। छन्दः वेदस्य पादः वर्त्तते। छन्द शब्दः **'चदि'** इति धातोः यस्यार्थः **'चन्दयति आह्लादयति चन्द्यते अनेन वा'** असुन् प्रत्यये चस्य छ आदेशे छन्दशब्दः निष्पद्यते। एषः अक्षराणां मात्राणां वा व्यवस्थायाः कारणात् उत्पद्यते। छन्दसः प्रथमो उल्लेखः **'ऋग्वेदे'** प्राप्यते। यथा गद्यस्य नियामकं व्याकरणं, तथैव छन्दस्य छन्दशास्त्रम्। पद्ये यत्र अक्षराणां मात्राणां प्रतिपादं गणना भवति तत् छन्दः।

**1. चरणम्/ पदम्/ पादः च।**
**समचरणः** - द्वितीयचतुर्थचरणयोः समन्वयः इति कथ्यते।
**विषमचरणः** - प्रथमः तृतीयः च चरणः विषमचरणः भवति।

**2. वर्णः मात्रा च –** स्वरध्वनिः ह्रस्वदीर्घः वा वर्णः इति उच्यते।

**ह्रस्वस्वरः** - अ,इ,उ,ऋ,क,कि,कु,कृ इति।

**दीर्घस्वर** :- आ,ई,ऊ,ॠ,ए,ऐ,ओ,औ,का,की,कू,के.कै,को,कौ इत्यादयः।

**मात्रा** - *एकमात्रा भवेत् ह्रस्वः द्विमात्रा दीर्घ उच्यते।*
*त्रिमात्रा प्लुतज्ञेयं व्यञ्जनम् अर्धमात्रकम्।।*

***3.* संख्याक्रमश्च** - गुरु,लघु -
*संयुक्ताद्यं दीर्घं स्वानुस्वारं विसर्गश्च।*
*विज्ञेयमक्षरं गुरुः पादान्तस्थ विकल्पेन।।*

***4.* गणः -**
*आदिमध्यावसानेषु भजसा यान्ति गौरवम्।*
*यरता लाघवं यान्ति मनौतु गुरु लाघवम्।।*

| भगण | जगण | सगण | यगण | रगण | तगण | मगण | नगण |
|---|---|---|---|---|---|---|---|
| SII | ISI | IIS | ISS | SIS | SSI | SSS | III |
| चन्द्र | सूर्य | वायु | जल | अग्नि | आकाश | भूमि | स्वर्ग |

**5. गतिः** – श्लोकपाठस्य प्रवाहः लयः वा गतिः उच्यते।

***6.* यतिः / विरामः** - *जिह्वेष्ट विश्रामस्थानं कवीभिः यति उच्यते।*
*सा विच्छेद दिग्माद्यैः पदैः वाच्यानि जेच्छाया।।*

छन्दः मुख्यतः द्विविधम् वैदिकलौकिकं च। वैदिकछन्दः एकविंशतिः, लौकिकछन्दः
चतुर्विधम्।

1. **वर्णिकछन्दः** – यस्मिन् श्लोके अक्षरसंख्या सर्वेषु चरणेषु समाना भवति स वर्णिकछन्दः।
2. **वर्णिकवृत्तछन्दः** – अस्मिन् छन्दसि वर्णगणना भवति।
3. **मात्रिकछन्दः** – यस्य श्लोकस्य सर्वेषु चरणेषु समानसंख्या मात्राः सन्ति।
4. **मुक्तछन्दः** - यस्मिन् श्लोके वर्णात्मकः परिमाणात्मकः वा प्रतिबन्धः नास्ति।

एतादृशस्थले आचार्यसम्पदानन्दमिश्रमहोदयः अस्मिन् ग्रन्थे रामायणे प्रयुज्यमाणानां षोडशछन्दसां विवेचनं कृतवान्। तद्यथा –

| | |
|---|---|
| 1.अनुष्टुप् | 9.वसन्ततिलकम् |
| 2.इन्द्रवज्रा | 10.पुष्पिताग्रा |
| 3.उपेन्द्रवज्रा | 11.अपरवक्त्रम् |
| 4.वंशस्थः | 12. सुन्दरी |
| 5. इन्द्रवंशा | 13.औपछन्दसिकम् |
| 6.वैश्वदेवी | 14.भुजङ्गप्रयातम् |
| 7.प्रहर्षिणी | 15.उपजातिः |
| 8. रुचिरा | 16. मालिनी |

**✯रामायणम् -**

रामस्य अयनं(चरितं) रामायणम्। रामायणम् आदिकाव्यं सर्वेषां संस्कृतभाषाकाव्यानां जीवातुभूतं च भवति। रामायणं महाभारतवत् कश्चिद् इतिहासग्रन्थो भवति। संस्कृतसाहित्येषु रामायणवत् प्रसिद्धः लोकप्रियश्च अन्यो ग्रन्थो नास्तीति वक्तुं शक्यते। नीतिदृष्ट्या काव्यात्मकदृष्ट्या लोकोपकारकदृष्ट्या च रामायणस्य महत्त्वं वर्धते। पितृपुत्रधर्मस्य, पतिपत्नीधर्मस्य, भ्रातृधर्मस्य तथा अन्यकौटुम्बिकधर्मस्य च आदर्शभूतो अयं ग्रन्थः। आदिकाव्यस्य रामायणस्य कर्ता श्रीमद्वाल्मीकिः। पारंपरिक इतिहासरेवम् कथ्यते यत् श्रीवाल्मीकिः पूर्वं कश्चित् तस्करः (निषादः) आसीत् रत्नाकरो इति नाम्ना। सप्तर्षीणां दर्शनानन्तरं राममन्त्रजपपूर्वकतपसा रत्नाकरः वाल्मीकिः संजातः। रामायणे न केवलं युद्धमात्रं प्रत्युत सकलालङ्काराणां प्रकृतिसौन्दर्यस्य धर्मस्य च यत्र तत्र वर्णनं दृश्यते। सरलसंस्कृतभाषापठनार्थम् अत्यन्तोपयोगिसाधनं च भवत्येतत् रामायणमादिकाव्यम् इति प्रसिद्धम्। इतिहासग्रन्थः इत्यपि भाव्यते एतत्। एतस्य ग्रन्थस्य रचयिता वाल्मीकिः। किरातकुले उत्पन्नः सः नारदस्य उपदेशात् तपः अकरोत्। तस्य शरीरम् आवृत्य वल्मीकः उत्पन्नः। ततः स बहिः आगतः इत्यतः तस्य नाम **'वाल्मीकिः'** इति काचित् कथा श्रूयते।

तमसानदीं स्नानार्थं गच्छन् वाल्मीकिः व्याधेन मारितं क्रौञ्चं पश्यति। तदा शोकाकुलः सः **'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः'** इति व्याधं शपति । ततः नारदमुखात् रामस्य कथां श्रुत्वा सः रामायणं रचयति। सीतारामयोः वियोगः रामायणस्य मुख्यं कथावस्तु।

महाभारते रामायणस्य कथा वर्णिता दृश्यते। पाणिनेः अष्टाध्याय्याम् अपि कैकेयीकौसल्यादयः शब्दाः उपलभ्यन्ते। अतः रामायणं महाभारतात् पाणिनेः च पूर्वम् आसीत् इति स्पष्टम्। रामायणं कदा आसीत् इति विषये मतभेदाः बहवः सन्ति। तथापि

एतावत्तु वक्तुं शक्यते यत् वाल्मीकिः रामायणं ख्री. पू पञ्चशतवर्षेभ्यः पूर्वम् रचितवान् स्यात् इति। रामायणग्रन्थे २४००० श्लोकाः सन्ति। रामायणस्य प्रतिसहस्रतमस्य श्लोकस्य आदौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते। पाठभेदादयः न भवेयुः इति उद्देश्येन एवं कृतं स्यात् कविना। रामायणं सर्वासु भारतीयभाषासु बह्वीषु विदेशीयभाषासु च अनूदितम् उपलभ्यते। एतस्मात् रामायणस्य जनप्रियता अतिस्पष्टा भवति। वाल्मीकेः शैली ललिता सरला सुन्दरी च। श्रीरामस्य धर्मनिष्ठा, सीतायाः सौशील्यं, भरतस्य भ्रातृवात्सल्यं, लक्ष्मणस्य कर्तव्यनिष्ठा, आञ्जनेयस्य कार्यदक्षता, सुग्रीवस्य सौहार्दभावः इत्यादयः अंशाः अतिरमणीयतया चित्रिताः तेन। संस्कृतसाहित्यनिर्माणे वाल्मीकिः शकपुरुषः इत्यत्र न अतिशयोक्तिः।

- **रामायणस्य उद्भवः**

एकस्मिन् दिने वाल्मीकिमहर्षिः सन्ध्यावन्दनार्थं स्वशिष्यैः साकं नदीतीरं गतवान्। तत्र कश्चन निषादः वृक्षस्योपरि विद्यमानयोः क्रौञ्चयोः मध्ये एकं मारितवान्। एतत् हृदयभेदकं दृश्यं कवेः मुखतः छन्दोबद्धरूपेण दुःखप्रवाहम् अकारयत्। तद्यथा –

***मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।***
***यत्क्रौश्चमिथुनादेकमवधीः काममोहितम्॥ इति॥[3]***

(हे निषाद, त्वं शाश्वतीः समाः प्रतिष्ठां मा अगमः यत् क्रौश्चमिथुनात् काममोहितम् एकम् अवधीः) तदनन्तरं मम मुखतः शापवाक्यमागतम् इति चिन्तया महर्षिः ततोऽपि अधिकं दुःखम् अनुभूतवान्। किन्तु नारदमहर्षिणा प्रचोदितं तद् दुःखम् अपनीय स्वमुखतः आगतस्य श्लोकस्यापरम् अर्थं ज्ञातवान्। तद्यथा – हे मानिषाद, त्वं शाश्वतीः समाः प्रतिष्ठाम् अगमः, यत् क्रौञ्चमिथुनात् काममोहितम् एकम् अवधीः इति॥ एषः विष्णुवन्दनपरः श्लोकः इत्यवगत्य तेन प्रेरितः वाल्मीकिः आदिकाव्यस्य रामायणस्य रचनामकरोत्।

वस्तुतः वाल्मीकिरामायणे प्रयुज्यमानेषु छन्दस्सु अनुष्टुप्-छन्दसः उदाहरणं आचर्यसम्पदानन्दमिश्रमहोदयेन एवं प्रतिपादितम्। तद्यथा–

अनुष्टुप् छन्दसः लक्षणं यथा –
***श्लोकेषष्ठगुरुज्ञेयं सर्वत्र लघुपञ्चमम्।***
***द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घ मन्ययोः॥[4]***

यस्य छन्दसः चतुर्षु चरणेषु पञ्चमवर्णः लघुः षष्ठवर्णः गुरुः एवं च चतुर्षु पादेषु सप्तमवर्णः ह्रस्वः अपि च प्रथमतृतीयचरणयोः सप्तमवर्णः दीर्घः भवति तदेव अनुष्टप् छन्द इत्यभिधीयते। उदाहरणम्–

***लोकानां त्वं परो धर्मः पुरुषः पुरुषोत्तमः।***
***शरण्यं शरणं च त्वाम् आहुर्दिव्या महर्षयः॥ इति॥[5]***

हे भगवन्! त्वमेव सर्वलोकेषु परमगुणमूर्तिः परमात्मा असी। पवित्रऋषयः त्वां मनुष्याणां सर्वविधहितसाधनार्थं स्मरन्ति।

पुनः रामयणे प्रयुज्यमानेषु छन्दस्सु रथोद्धता छन्दसः उदाहरणं प्रतिपादयति।

(रत्थोद्धता छन्दसः लक्षणं तद्यथा –
***आद्यमक्षरमतस्तृतीयकं सप्तमं च नवमं तथाऽन्तिमं।***
***दीर्घमस्तु ननु यत्र सन्मतो! तां वदन्ति कवयो रथोद्धताम्॥ इति ॥[6]***

यस्य छन्दसः सर्वेषु पादेषु प्रथम-तृतीय-सप्तम-नवम-एकादशवर्णेषु दीर्घः भवति। तदेव कविभिः रथोद्धताछन्देति उक्तम्)।

उदाहरणं यथा –
***आञ्जनेयमतिपाटलाननं***
***काञ्चनाद्रिकमनीयविग्रहम्।***
***पारिजाततरूमूलवासिनं***
***भावयामि पवमाननन्दनम् ॥ इति॥[7]***

भगवान् हनुमान् (बृहत्जङ्घायुक्तः) पाटलमुखं वायुदेवस्य मातुः अञ्जनस्य च पुत्रं, यस्य प्रतिबिम्बं सुवर्णशैलवत् सुन्दरं, पारिजातस्य आकाशप्रवालवृक्षस्य अधः निवसन्तं च चिन्तयामि।

***यत्र यत्र रघुनाथकीर्त्तनं***
***तत्र तत्र कृतमस्तकाञ्जलिम्।***
***वाष्पवारि परिपूर्णलोचनं***
***मारुति नमतराक्षसान्तकम् ॥ इति ॥[8]***

यत्र यत्र रघुजातीयेश्वरस्य रामस्य नामजपः भवति तत्र तत्र हनुमतः प्राञ्जलिः अश्रुपूर्णाक्षः च लभ्यते। तं दानवनाशकं हनुमन्तं प्रणम्यते।

**★निष्कर्षः –**

रामायणमादिकाव्यं भवति, तत्र वाल्मीकिः छन्दोवद्धोतया प्रत्येकानां श्लोकानां सन्निवेशनं कृतवान् एवमेव सर्वे कवयः अपि स्वीयग्रन्थे छन्दसां प्रयोगं कृत्वा स्वकीयां रचनां सम्पादयन्ति। काव्यं छन्दरहितं भवति चेत् तत्र काव्यसौन्दर्यानुभूतिः भवितुं नार्हति। अतः श्लोकानां छन्दोवद्धतया रचना करणीया इति रामायणात् ज्ञायते।

मिश्रमहोदयेन स्वकीये **"छन्दोबल्लरी"** ग्रन्थे रामायणे प्रयुज्यमानानां छन्दसां विषयं उल्लिखितम्। प्रायशः रामायणे प्रयुज्यमानानां षोड़शछन्दसां उदाहरणसहितेन वहूनां श्लोकानां प्रतिपादनं कृतम्। आभारते प्रायशः जनाः रामायणविषये अल्पाधिकं जानन्ति एव, परन्तु रामायणे केषां छन्दसां प्रयोगः आदिकविवाल्मीकिना कृतः वर्त्तते, इत्यस्मिन् प्रसङ्गे कविना सुष्ठुतया प्रतिपादितम्। अनेन प्रकारेण कवेः कृतिषु रामायणस्य प्रभावः दरीदृश्यते।

**★सन्दर्भग्रन्थसूची**


1. **अमरकोषः** – श्रीमदमरसिंहप्रणीतः श्रीमन्नालाल अभिमन्यु (हिन्दी व्याख्याकारः) चौखम्बाविद्याभवनम्, वाराणसी – 2008.
2. **नीतिशतकम् (भर्तृहरिविरचितं)** – चौखम्बाप्रकाशनम्, डॉ. राजेश्वरशास्त्री मुसलगाँवकरः वाराणसी – 1950.
3. **नैषधीयचरितम्** – महाकविश्रीहर्षविरचितं, चैखम्बा संस्कृतसीरीज्, वाराणसी – 2012.
4. **संस्कृतसाहित्येतिहासः** – हरेकृष्णशतपथी, किताव् महल, कटकम् – 1998.
5. **छन्दोबल्लरी(A hand book of Sanskrit prosody)** – डॉ. सम्पदानन्दमिश्रः, श्रीअरविन्द सोसाइटि, पुडुचेरी – 1999.
6. **श्रुतबोधः** – प. कनकलाल् ठक्कुरः(टीकाकारः), प.श्रीब्रह्मशङ्करमिश्रः (संस्कर्त्ता) चौखम्बासुरभारतीप्रकाशनम्, वाराणसी – 1993.
7. **वाल्मीकिरामायणम्** – हनुमानप्रसादः, गीताप्रेस्, गोरखपुरम् – 2018.
8. **हनुमन्नाटकम्** – चौखम्बा संस्कृत सीरीज्, वाराणसी – 2013.
9. **हनुमत्सोत्रसंग्रहः** – गीताप्रेस्, गोरखपुरम् – 2018.


**पाद टिप्पणी**

1 नीति.श(श्लो.सं-12)
2 नै.च.(पृ-45)
3 रामा,बा.का-2/15
4 श्रु.बो. पृ-5
5 वा.रामा, यु.का-177/17
6 श्रु.बो./13
7 हनु.स्त्रो.सं,पृ-52
8 हनु.ना,पृ-78